Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# सूत्रेष्वतिदेश:

डॉ. दिनेश चौबे,
सहायकाचार्य:, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालय:, उज्जयिनी

**Article Info**
Volume 6, Issue 6
**Page Number :** 167-171
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Dec 2023
Published : 30 Dec 2023

**सारांश:-** पाणिनीयसूत्राणि संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदात् षोढा विभक्तानि। एषु षड्विधेषु सूत्रेषु अतिदेशसूत्रमन्यतमम्। आरोपबोधकजनकोऽतिदेश:। अतिदिश्यते अनेन इत्यर्थे अतिपूर्वाद्दिशे: करणे घञि निष्पन्नोऽयम् अतिदेशशब्दो एकत्रविद्यमानानां धर्माणामन्यत्र बोधनमित्यर्थको भवति। अनया रीत्या गौर्वाहीक: इति वाक्यमपि अतिदेशवाक्यमित्युच्यते।

**विशेषशब्दा:** – अतिदेशसूत्रस्वरूपम्, अतिदेशसूत्राणां द्वैविध्यम्, तादात्म्यातिदेश:, अभावातिदेश:, निमित्तातिदेश:, व्यपदेशातिदेश:, अर्थातिदेश:, रूपातिदेश:, शास्त्रातिदेश: इत्यादय:।

**उपोद्धात:-**पाणिनीयसूत्राणि संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदात् षोढा विभक्तानि। एषु षड्विधेषु सूत्रेषु विधिसूत्रस्यैव सर्वोत्तमं प्राधान्यत्वम्, तस्यैव साक्षाल्लक्ष्यसंस्कारकत्वात्। अन्येषां तु विधिसूत्रार्थोपकारकत्वमेव, न तु साक्षाल्लक्ष्यसंस्कारकत्वम्। एव एव विधिसूत्रस्य प्रधानशास्त्रमिति, विध्यतिरिक्तानां संज्ञादिसूत्राणां तु गुणशास्त्रमिति, अप्रधानशास्त्रमिति च व्यवहार:। एषु षड्विधेषु सूत्रेषु अतिदेशसूत्रमन्यतमम्। भाष्यकारैरतिदेशसूत्राणि द्विधा इति प्रोक्तम्। तादात्म्य-अभाव-निमित्त-व्यपदेश-अर्थ-रूप-शास्त्र-कार्यभेदेन पुनरष्टविधानि भवन्ति इति केचित्। न्यासकारैस्तु पञ्चैव परगणिता:। तत्रैव पदमञ्जर्यां तादात्म्यातिदेशमपि योजयित्वा षड्विधत्वमुक्तम्। एतदेव अनुसृतं तृज्वत्सूत्रेसिद्धान्तकौमुदिव्याख्याने तत्त्वबोधिनीकारैस्तु अर्थातिदेशेन सह सप्त अतिदेशा: परिगणिता:। एतत्सर्वं दृष्ट्वा मया सूत्रेष्वतिदेश: इति शीर्षकेन शोधलेख: विलिखत:।

**अतिदेशसूत्रस्वरूपम्-** अविद्यमानधर्मप्रापकं सूत्रमतिदेशसूत्रम्। आरोपबोधकजनकोऽतिदेश:। अतीत्युपसर्गपूर्वकात् दिश अतिसर्जने इति धातो: भावे घञि अतिदेशशब्द: निष्पन्न:। व्युत्पत्यर्थस्तु अति अतिक्रम्य, देश: उददेश: बोधनम् अतिदेश: इतर्ि भवति। यथा गौर्वाहीक: इति वाक्येन गवि विद्यमानानां जाड्यमान्द्यादिधर्माणां स्वविषयं गामतीत्यान्यत्र वाहीके बोधनं क्रियते। एवमन्यत्र विद्यमानानां धर्माणामन्यत्र अतिदेशनमतिदेशो भवति। अतिदिश्यते अनेन इत्यर्थे अतिपूर्वाद्दिशे: करणे घञि निष्पन्नोऽयम् अतिदेशशब्दो एकत्रविद्यमानानां धर्माणामन्यत्र बोधनमित्यर्थको भवति। अनया रीत्या गौर्वाहीक: इति वाक्यमपि अतिदेशवाक्यमित्युच्यते।

सादृश्यबोधकवाक्यम् अतिदेशवाक्यमित्यपि वक्तुं शक्यते। सादृश्यं च 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा **चन्द्र इव मुखम्** इत्यादौ चन्द्रभिन्ने मुखे चन्द्रगतवर्तुलत्वाह्लादकत्वादिभूयो धर्मसम्बन्ध: बोध्यते। अत एव सिद्धान्तमुक्तावल्याम् उपमानखण्डे **'यत्र आरण्यकेन केनचित् ग्रामीणाय उक्तं गोसदृशो गवयपदवाच्य:' इति, पश्चात् ग्रामीणेन क्वचिदरण्यादौ**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**गवयो दृष्टः, तत्र गोसादृश्यदर्शनं यज्जातं तदुपमितिकरणम्, तदनन्तरं 'गोसदृशो गवयपदवाच्यः' इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदुपमितिः, इत्यादिना उपमितिनिरूपणावसरे 'गोसदृशो गवयपदवाच्यः'** [1] इति सादृश्यबोधकवाक्यस्य अतिदेशवाक्यत्वमुक्तम्।

**सादृश्यवाचकशब्दप्रयोगेऽतिदेशत्वप्रतीतिः**– लोके सादृश्यवाचकानां यथेवादिशब्दानां, वतिप्रत्ययस्य वा प्रयोगे साक्षादतिदेशोऽवगम्यते। यथा– **'गौरिव गवयो वर्तते, यथा गौस्तथा गवयः, गोसदृशो गवयः, गोवद्गवयो वर्तते'** [2] इत्यादिप्रयोगेषु यथेवादिशब्दानां प्रयोगाद्गोसादृश्यम्' गोगतधर्मातिदेशो गवये साक्षात्प्रतीयते। क्वचित्तु यथेवादिशब्दाप्रयोगेऽपि वाच्यार्थानुपपत्त्या सादृश्यार्थः लक्ष्यते। यथा अग्निर्माणवकः, गौर्वाहीकः इत्यादौ। अत्र अत्यन्तभिन्नयोः अग्निमाणवकयोः, गोवाहीकयोश्च अभेदान्वयानुपपत्त्या अग्निसदृशो माणवकः, गोसदृशो वाहीक' इत्यर्थः प्रतीयते।

**शास्त्रेष्वतिदेशः**- एवं शास्त्रेष्वप्यन्यदीयधर्मानन्यत्र बोधयितुम् अतिदेशः स्वीकृतः। यथा– मीमांसाशास्त्रे **'प्रकृतिवद्विकृतिः कर्तव्या**[3]**'** इत्यनेन प्रकृतियागीयानामङ्गानां विकृतियागेष्वतिदेशः विहितः। दशरूपकनिरूपणग्रन्थेषु नाटकं सलक्षणं निरूप्य, प्रकरणे नाटकात् विलक्षणान् अंशांश्च निरूप्य शेषं **नाटकवत्सर्वम्**[4] इति वचनेन नाटकीयाङ्गानां केषांचित्प्रकरणेऽतिदेशः समाविष्टः।

एवं व्याकरणशास्त्रेऽपि एकत्र विद्यमानान् विहितान् वा धर्मान् अन्यत्र बोधयितुं **'स्थानिवदादेशोऽनल्विधौ**[5]**'** इत्यादीन्यतिदेशसूत्राणि पाणिनिना कृतानि। यथा राम + ङे इत्यत्र ङेप्रत्ययस्य **'ङेर्यः**[6] इत्यनेन सूत्रेण य–इत्यादेशे राम + य इति स्थिते यादेशे यञादित्वस्य सत्त्वेऽपि सुप्त्वाभावात् अदन्तस्याङ्गस्य दीर्घः स्यात् यञादौ सुपि परे इत्यर्थकेन **'सुपि च'**[7] इत्यनेन सूत्रेण दीर्घाभावे सिद्धे राम + य इत्यत्र प्रकृतसूत्रेण ङेप्रत्ययवृत्तिसुप्त्वं यादेशेऽतिदिश्यते। तदा स्वतो विद्यमानं यञादित्वम् आतिदेशिकं सुप्त्वमाश्रित्य यञादिसुप्परत्वस्य सत्त्वात् सुपि च इत्यनेन सूत्रेण दीर्घप्रवृत्तौ रामाय इति सिद्ध्यति।

**अतिदेशसूत्राणां द्वैविध्यम्-** तान्यतिदेशसूत्राणि वतिप्रत्ययान्तघटितानि, तदघटितानि चेति पाणिनीये द्वेधा समुपलभ्यन्ते। यथेवादिशब्दघटितानि तु प्रायशः न सन्त्येव। तत्र **'आद्यन्तवदेकस्मिन्**[8]**'**, **'स्थानिवदादेशोऽनल्विधौ**[9]**'**, **'कर्मवत्कर्मणा तुल्यक्रियः**[10]**'** **'तृजवत्क्रोष्टः**[11]**'** इत्यादीनि वत्यन्तघटितानि अतिदेशसूत्राणि। वत्यन्ताघटितानि तु **'गाङ्कुटादिभ्योऽञ्णिन्ङित्**[12]**'**,

---

[1]. न्यायसिद्धान्तमुक्तावली, पृ–265

[2]. वैयाकरणभूषणसारः, पृ–289

[3]. अर्थसंग्रहः पृ–124

[4]. दशरूपकम् पृ–35

[5]. पाणिनिसूत्राणि –1।1।56

[6]. पाणिनिसूत्राणि 7।1।13

[7]. पाणिनिसूत्राणि 7।3।102

[8]. पाणिनिसूत्राणि 1।1।21

[9]. पाणिनिसूत्राणि 1।1।56

[10]. पाणिनिसूत्राणि 3।1।7

[11]. पाणिनिसूत्राणि 7।1।95

[12]. पाणिनिसूत्राणि 1।2।1

**'असंयोगाल्लिट् कित्[13]' 'गोतो णित्[14]'** इत्यादीनि। **अथवा नेदं संज्ञाकरणम्, तद्वदतिदेशोऽयम्, बहुगणवतुडतयः संख्यावद्भवन्तीति। स तर्हि वतिनिर्देशः कर्तव्यः, नह्यन्तरेण वतिमतिदेशो गम्यते। तद्यथा एषः ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह, ते मन्यामहे, ब्रह्मदत्तवदयं भवतीति। एवमिहापि असंख्यां सख्येत्याह संख्यावदिति गम्यते इति बहुगणवतुडति संख्या[15]'** इति सूत्रभाष्याद् वतिप्रत्ययस्यानिर्देशेऽपि वत्यर्थस्फूर्त्या अतिदेशत्वं स्वीकर्तुं शक्यते। वतिप्रत्ययविर्देशे तु अतिदेशत्वं स्पष्टं प्रतीयते इत्यत्र नास्ति कस्यापि संशीतिः।

**प्रकारान्तरेण अतिदेशसूत्राणामष्टविधत्वम्-** प्रकारान्तरेण अतिदेशसूत्राणि तादात्म्य-अभाव-निमित्त-व्यपदेश-अर्थ-रूप-शास्त्र-कार्यभेदेन पुनरष्टविधानि भवन्ति इति केचित्। न्यासकारैस्तु स्थानिवत्सूत्रे **"अतिदेशोऽनेकप्रकारः - निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, कार्यातिदेशश्चे"ति**[16] पञ्चैव परगणिताः। तत्रैव पदमञ्जर्यां तादात्म्यातिदेशमपि योजयित्वा "षोढातिदेशः- निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, तादात्म्यातिदेशः, कार्यातिदेशश्चे[17]ति षड्विधत्वमुक्तम्। एतदेव अनुसृतं तृज्वत्सूत्रेसिद्धान्तकौमुदिव्याख्याने तत्त्वबोधिनीकारस्तु निमित्त-व्यपदेश-तादात्म्य-शास्त्र-कार्य-रूपभेदात् षड्विधान् अतिदेशानुदाहृत्य अन्ये तु-

**कार्यरूपनिमित्तार्थशास्त्रातादात्म्यशब्दिताः।**
**व्यपदेशश्च सप्तैतानतिदेशान् प्रचक्षते॥**[18]

इत्युक्त्वा अर्थातिदेशेन सह सप्त अतिदेशाः परिगणिताः। अभावातिदेशः अतिदेशसंख्याने न केनाप्युक्तः तथापि सम्भवाभिप्रायेण पृथक्परिगणितः। न च कार्यशास्त्ररूपाद्यतिदेशकानि इव अभावातिदेशकानि सूत्रणि पृथक् न सन्ति। **अचः परस्मिन् पूर्वविधौ**[19] इत्यादीनां भावाभावोभयातिदेशकत्वं स्वीकृतं कैयटादिभिः।तथा हि -

**तादात्म्यातिदेशः**- सहनिर्दिष्टयोः भिन्नयोः पदयोः कस्मिंश्चित् अन्यतादात्म्यस्य अतिदेशनं तादात्म्यतिदेशः। यथा - **सुबामन्त्रिते पराङ्गवत्स्वरे**[20]।

**अभावातिदेशः-** क्वचिद्विद्यमानस्य धर्मस्य, क्वचिल्लक्ष्ये प्रवृत्युन्मुखस्य शास्त्रस्य, कार्यस्य वा निवृत्तेः, अभावस्य अतिदेशनम्।

**निमित्तातिदेशः-** विधिशास्त्रापेक्षितनिमित्तेषु कस्यचन अभावेन लक्ष्ये विधिशास्त्राप्रवृत्तौ सम्भावितायां सत्यां तत्प्रवृत्यौपयिकतया तन्निमित्तस्य तत्र अतिदेशनं, प्रापणम्, निमित्तातिदेशः। यथा-स्थानिवदादेशोनल्विधौ[21]।

**व्यपदेशातिदेशः-** अविद्यमानस्य व्यपदेशस्य प्रापणम्, व्यपदेशातिदेशः। यथा-**आद्यन्तवदेकस्मिन्**[22]।

---

[13]. पाणिनिसूत्राणि 1।2।5

[14]. पाणिनिसूत्राणि 7।1।90

[15]. पाणिनिसूत्राणि 1।1।23

[16]. काशिकावृत्तिन्यासः-1.1.56

[17]. काशिकावृत्तिपदमञ्जरी - 1.1.56

[18]. पाणिनीयसूत्राणि 7.1.15

[19]. पाणिनीयसूत्राणि [1।1।57

[20]. पाणिनीयसूत्राणि 2.1.2

[21] पाणिनिसूत्राणि 1।1।56

**अर्थातिदेश**:- कस्यचन शास्त्रीयकार्यस्य प्रवृत्तये यत्किञ्चिदर्थवत: शब्दस्य अन्यार्थातिदेशनम् अर्थातिदेश:। यथा- **परवल्लिङ्गं द्वन्द्वतत्पुरुषयो**:[23] ।

**रुपातिदेश**:- यत्र न केवलमर्थ:, अपि तु अर्थविशिष्टं किञ्चिच्छब्दरूपम्, अर्थासम्भवे केवलशब्दस्वरूपमेव वा अतिदिश्यते, तत्र रूपातिदेश:। यथा- **द्विर्वचनेऽचि**[24]।

**शास्त्रातिदेश:-** कार्यविधायकस्य शास्त्रस्य अतिदेशनं शास्त्रातिदेश:। यथा – **प्रत्ययलोपे प्रत्ययलक्षणम्**[25]**।**

**कार्यातिदेश**:- अन्यत्र विहितस्य प्रत्ययादिरूपकार्यस्य अतिदेशनम्, कार्यातिदेश:। यथा- **कर्मवत्कर्मणा तुल्यक्रिय**:[26]। एवं प्रकारेण मया समासेन अतिदेशविचार: व्याख्यानपूरस्सरं विचारित:।

## परिशीलितग्रन्थसूचि:


1. पाणिनि:, अष्टाध्यायी (पदच्छेद-वृत्ति-वार्तिक-टिप्पनी-सहिता)। पाण्डेय:, गोपालदत्त: (सम्पा0, वाराणसी: चौखम्बा सुरभारती प्रकाशन। 2009
2. भट्टोजिदीक्षित:,वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता, प्रथमखण्ड:), शर्मा, परमेश्वरानन्द: (सम्पा0), वाराणसी: मोतिलाल बनारसीदास।2010
3. शास्त्री, भीमसेन:, लघुसिद्धान्तकौमुदी (भैमीव्याख्योपेता, प्रथमखण्ड:), देहली: भैमी प्रकाशन, 2010।
4. वामनजयादित्यौ, काशिका (न्यासपदमञ्जरीभावबोधिनीसहिता, प्रथमखण्ड:), त्रपाठी, जयशङ्करलाल: (सम्पा), वाराणसी: तारा बुक एजेन्सी,1985।
5. पतञ्जलि:, व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लितम्, प्रथमखण्ड:), शास्त्री, सीताराम: (सम्पा), देहली: चौखम्बा संस्कृत प्रतिष्ठान।2014।
6. पतञ्जलि:, व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लितम्, पञ्चमखण्ड:), शास्त्री, सीताराम: (सम्पा0), देहली: चौखम्बा संस्कृत प्रतिष्ठान,2014।
7. पतञ्जलि:,व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लितम्, षष्ठखण्ड:), शास्त्री, सीताराम: (सम्पा0)। देहली: चौखम्बा संस्कृत प्रतिष्ठान।2014
8. पतञ्जलि:, व्याकरणमहाभाष्यम् (प्रदीपोद्योतभावबोधिनीव्याख्योपेतम्, द्वितीयखण्ड:)। त्रपाठी, जयशङ्करलाल: (सम्पा0), वाराणसी: चौखम्बा कृष्णदास अकादमी।2013।


---

[22] पाणिनिसूत्राणि 1।1।21

[23] पाणिनिसूत्राणि 2..26

[24] पाणिनिसूत्राणि 1.1.23

[25] पाणिनिसूत्राणि 1.1.62

[26] पाणिनिसूत्राणि 3।1।7

9. नागेशः, लघुशब्देन्दुशेखरः (ज्योत्स्नाटीकोपेतः, प्रथमखण्डः)। तिवारी, हरिनारायण (सम्पा0)। वाराणसीः चौखम्बा संस्कृत संस्थान। 2016।
10. नागेश। लघुशब्देन्दुशेखरः (भैरवीव्याख्योपेतः, प्रथमखण्डः)। शर्मा, तेजपालः (सम्पा0)। वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।2002।
11. नागेशः। लघुशब्देन्दुशेखरः (राधिकाव्याख्योपेतः)। द्विवेदी, ब्रह्मदत्तः (व्याख्याकारः)। वाराणसीः चौखम्बा संस्कृत सीरीज अफिस।2013।
12. भर्तृहरिः। वाक्यपदीयम् (प्रकाशकनारायणटीकाद्वयोपेतम्)। तिवारी, हरिनारायणः (सम्पा0)। वाराणसीः चौखम्बा संस्कृत सीरीज आफिस।2015।
13. श्रिष्टि, लक्ष्मीनरसिंहः, पाणिनये अतिदेशानुशीलनम्। तिरुपतिः: राष्ट्रीयसंस्कृतविद्यापीठम्।2008
14. भट्टाचार्यः, विश्वनाथपञ्चाननः। न्यायसिद्धान्तमुक्तावली (किरणावलीव्याख्याव्योपेता)। शास्त्री, नारायणचरणः (सम्पा0)। वाराणसीः चौखम्बा संस्कृत संस्थान।2014।
15. पतञ्जलिः। व्याकरणमहाभाष्यम्। शास्त्री, चारुदेवः (सम्पा0)। वाराणसीः मोतिला 2012।